स्रवन्ति नश्यन्ति भवन्ति चान्ये । कालानुबन्धं चिरमादधाति सैवापचीति प्रवदन्ति केचित् । ते ग्रन्थयः गण्डमालाया एव गण्डाः केचिदपाकाः सन्तः स्रवन्ति, केचित् नश्यन्ति पुनः प्ररोहन्ति । अन्ये भवन्ति च । कालानुबन्धाच्चिरमादधाति या गण्डमाला चिरं तिष्ठति सैवापची इति केचिद्वदन्ति । अपच्याः साध्यत्वादिकमाह । साध्या स्मृता पीनसपार्श्वशूलकासज्वरच्छर्द्दियुता त्वसाध्या । ग्रन्थेर्लक्षणमाह । वातादयो मांसमसृक् च दुष्टं संदूष्य मेदश्च तथा शिराश्च । वृत्तोन्नतं विग्रथितं तु शोथं कुर्व्वन्त्यतो ग्रन्थिरिति प्रदिष्टः । विग्रथितं ग्रन्थिरूपम्" । गण्डमालाऽस्त्यस्य इनि । गण्डमालिन् तद्रोगवति त्रि० । तस्य श्राद्धे वर्ज्जतामाह मनुः "भ्रामरी गण्डमाली च श्वित्र्यथो पिशुनस्तथा" ।

**गण्डमालिका** स्त्री गण्डानां ग्रन्थीनां माला यत्र कप् कापि अत इत्त्वम् । १लज्जालुलतायाम् रत्नमा० ।

**गण्डयन्त** पु० गडि-झच् । १मेघे उज्ज्वलदत्तः ।

**गण्डली** पु० गण्ड इव भूमेरुच्छूनप्रदेशः क्षुद्रशैलस्तत्र लीयते ला-क्विप् । १महादेवे "गण्डली मेरुधामा च देवाधिपतिरेव च" भा० आनु० १७अ० । "शिवसहस्रनामोक्तौ "सुलोपः आर्षः" नीलकण्ठः ।

**गण्डलेखा** स्त्री लिख्यतेऽत्र लेखा स्थली गण्डः स्थलीव । १प्रशस्तगण्डस्थल्याम् ।

**गण्डशिला** स्त्री गण्डः भूमेरुच्छूनप्रदेश इव शिला । भूमेरुच्छूनप्रदेशवत् १स्थूलपाषाणे । "दृष्टोऽङ्गुष्ठशिरोमात्रः क्षणाद्गण्डशिलासमः" भाग०३।१३।२१ ।

**गण्डशैल** पु० गण्ड इव भूमेरुच्छूनप्रदेशः शैलः स्थूलोपलः, शैलस्य गण्ड इव वा राजद० पूर्वनि० । भूकम्पादिना पर्वतात् पतिते स्थूलपाषाणे अमरः । "लीलां दधौ राजतगण्डशैलः" "अस्मिन् भजन्ति कनकोपलगण्डशैलाः" । "योषाणामुरुभिरुरोजगण्डशैलैः" इति च माघः ।

**गण्डसाह्वया** स्त्री गण्डेन सहित आह्वयो यस्याः । १गण्डक्यां नद्याम् "गङ्गा च शतकुम्भा च शरयूर्गण्डकाह्वया" भा०व०२१२अ० । [ शब्दच० स्त्रियां ङीप् ।

**गण्डाङ्ग** पुंस्त्री गण्ड इव उच्छूनमङ्गं यस्य । १गण्डके

**गण्डान्त** न० "नक्षत्रतिथिलग्नानां गण्डान्तं त्रिविधं स्मृतम् । नवपञ्चचतुर्थीनां द्व्येकाङ्कघटिकामितम्" ज्योतिषोक्ते तिथिनक्षत्रादीनां सन्धिसमयभेदे उपयमशब्दे १२५८ पृ० विवृतिः । [वृक्षे भावप्र० ।

**गण्डारि** पु० गण्डरोगस्याऽरिः नाशकत्वात् । १कोविदार-

**गण्डाली** स्त्री गण्डेन ग्रन्थिनाऽल्यते भूष्यते अल-घञ् गौरा० ङीष् । १श्वेतदूर्वायां अमरः । गण्डमलति-अल-अण् गौरा० ङीष् । २सर्पाक्षीवृक्षे भावप्र० । [ हेम० ।

**गण्डि** पु० गड़ि-इन् । वृक्षस्य मूलाच्छाखावधिभागे (गुंडि)

**गण्डिक** त्रि० गण्डः बुद्बुद इवाकारेणास्त्यस्य ठन् । बुद्बुदोपमे १क्षुद्रपाषाणादौ "गन्धमादनपार्श्वे तु परे त्वपरगण्डिकाः" भा०भी०६अ० । "अपरे अस्य गन्धमादनस्यैवावयवभूता बुद्बुदोपमाः क्षुद्रशैलाः" नील० । अल्पार्थे ङीप् स्वार्थे क ह्रस्वः । २गण्डिका क्षुद्रगण्डपाषाणे स्त्री "तथा माल्यवतः शृङ्गे पूर्वपूर्वानुगण्डिका" भा०भी०७अ० । अत्र "नगं डिकाकारयोगं करेऽणुमिति" भा० आश्व० ८स्रोकं कश्चिदुदाजहार तच्चिन्त्यं तस्य स्रोकस्य नगमितिच्छेदः तदर्थस्तु नीलकण्ठेनोक्तः यथा नगं पर्वतं, डीयते विहायसा गच्छति डीः पक्षी ततः अल्पार्थे कन् डिका मशकादि तस्याकारेण योगोऽस्य तथाभूतं करे कुर्वे तथा च पर्वतमपि मशकीकर्तुं शक्नोमीति" ।

**गण्डीर** पु० गडि-बा० ईरन् । १समष्ठिलायां (शशा) ख्याते वृक्षे जटा० (गुमिया)ख्याते २शाकभेदे भरतः । ३सेहुण्डवृक्षे (सिजु) स्त्री राजनि० गौरा० ङीष् ।

**गण्डु (गण्डू)** पुंस्त्री गण्डत्रते गडि-आधारे उन् स्त्रीत्वे अप्राणिजातिवाचकत्वात् ऊङ् । १उपधाने (वालिश) जटा० तत्र कपोलरूपवदनैकदेशव्यापारसत्त्वात्तथात्वम् । २ग्रन्थौ पु० शब्दार्थचि० गण्डूपदः । गण्डुः ग्रन्थिरस्त्यस्य सिध्मा०वा लच । ३गण्डुल ग्रन्थियुते त्रि० । पक्षे मतुप् । गण्डुमत् तत्रार्थे त्रि० स्त्रियां ङीप् ।

**गण्डूपद** पुंस्त्री०गण्डुः ग्रन्थयः तद्युतानि पदानि यस्य । (केँचो) १किञ्जुलुके अमरः । स्त्रियां ङीष् । अल्पार्थे ङीप् । गण्डूपदी २क्षुद्रकिञ्जुलके अमरः । [ हेमच० ।

**गण्डूपदभव** न० गण्डूपद इव भवति भू-अच् । १सीसके

**गण्डूष** पु० गडि-ऊषन् । १मुखपूरणे २मुखान्तर्धृतजलादौ च "गण्डूषमुज्झितवता पयसः सरोषम्" माघः । "सुखोष्णः स्नेहगण्डूषो नस्यं स्नैहिकमेव च" सुश्रु० । "अपां द्वादशगण्डूषैर्मुखशुद्धिर्विधीयते" आ० त० । "तस्य जह्नुः सुतो, गङ्गां गण्डूषीकृत्य योऽपिबत्" भाग० ९।१५।३। "गजाय गण्डूषजलं करेणुः" कुमा० । २हस्ति